Cover Page

INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881(Print); IMPACT FACTOR :10.16(2026); IC VALUE:5.16; ISI VALUE:2.286
PEER REVIEWED AND REFEREED INTERNATIONAL JOURNAL
(Fulfilled Suggests Parameters of UGC by IJMER)
Volume:15, Issue:1(5), January 2026
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: Reviewed: Accepted
Publisher: Sucharitha Publication, India
Online Copy of Article Publication Available: www.ijmer.in

# रसगङ्गाधरानुसारं काव्यकारणम्

आचार्यः चक्रवर्ती रङ्गनाथन्

साहित्यविभागः

राष्ट्रियसंस्कृतविश्वविद्यालयः

तिरुपतिः

**शोधपत्रसंक्षिप्तिका**

अलङ्कारग्रन्थेषु काव्यस्य कारणं किम्? इति अयं विचारः बहुभिः प्रकारैः विहितः एव वर्तते। तत्र अत्यन्तं सैद्धन्तिकं तत्त्वं जगन्नाथेन स्वीयन्यायशैल्या रसगङ्गाधरे प्रत्यपादि। संप्रति सः विचारः अस्मिन् पत्रे यथामति प्रस्तूयते।

## उपोद्घातः

संस्कृतसाहित्यवाङ्मये अलङ्कारग्रन्थाः अनेके समुल्लसन्ति। तथापि तत्र केचन ग्रन्थाः मुकुटे मणयः इव राजन्ते। ते सर्वे विद्वदभिमताः प्रामाणिकाः सहृदयहृदयाह्लादकाश्च प्रकाशन्ते। तादृशेषु ग्रन्थेषु अन्यतमो वर्तते जगन्नथपण्डितनरेन्द्रस्य रसगङ्गाधरः। अयं च ग्रन्थः सहृदयानां हृदयानि मोदयति चिरं तच्च स्वयमुक्तं जगन्नाथेन

**रसगङ्गाधरनामा सन्दर्भोऽयं चिरं जयतु।**

**किञ्च कुलानि कवीनां निसर्गसंयञ्चि रञ्जयतु॥**[1]

अस्य ग्रन्थस्य ईदृशोऽयं महिमा कुतः? इति विचारे, सर्वैर्निश्चप्रचमिदमुच्यते यत् जगन्नाथेन पण्डितराजेन नवीनन्यायशैल्या साहित्यतत्त्वानि तथा परिष्कृतानि आलोचितानि, नूतनप्रकल्पाः आविष्कृताः येन अयं ग्रन्थकारः अद्वितीयो भ्राजते तथैव च तस्य ग्रन्थमणिरयम्। अधीतपदवाक्यप्रमाणोऽयं ग्रन्थकारः काव्यसिद्धान्तान् स्वकीयन्यायशैल्या प्रकटयति। प्रायेण सर्वत्रापि नूतनान् विषयान् प्रतिपादयन् विस्मापयति लोकान्। काव्यलक्षणं, काव्यकारणं, काव्यभेदाः, इति सर्वत्र प्राचीनमतनिराकरणपूर्वकम् अस्मिन् ग्रन्थे नवीनविचाराः उपस्थापिताः। तत्र च आदौ काव्यस्य लक्षणम् इत्थम् आलोचितं वर्तते।

[1] रसगङ्गाधरः 1- 8

Cover Page

INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881(Print); IMPACT FACTOR :10.16(2026); IC VALUE:5.16; ISI VALUE:2.286
PEER REVIEWED AND REFEREED INTERNATIONAL JOURNAL
(Fulfilled Suggests Parameters of UGC by IJMER)
Volume:15, Issue:1(5), January 2026
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: Reviewed: Accepted
Publisher: Sucharitha Publication, India
Online Copy of Article Publication Available: www.ijmer.in

**रमणीयार्थप्रतिपादकः शब्दः काव्यम्**[2]

इति काव्यलक्षणं ब्रवीति। अस्य च लक्षणस्य अयम् अर्थः रमणीयस्य सुन्दरस्य अर्थस्य प्रतिपादकः बोधकः शब्दः काव्यपदव्यपदेश्य इति।

एवम् उक्त्वा, घटितज्ञानं घटकज्ञानं प्रति कारणमिति रीत्या लक्षणघटिता रमणीयता नाम का इति जिज्ञासायाम् आह

**रमणीयता च लोकोत्तराह्लादजनकज्ञानगोचरता**[3],

पुनश्च लोकोत्तरत्वं नाम किमिति चेत्। **लोकोत्तरत्वं च आह्लादगतः चमत्कारत्वापरपर्यायः जातिविशेषः**[4] इति। ततः समूहालम्बनज्ञानमादाय लक्षणेऽतिव्याप्तिवारणाय निष्कृष्टरूपेण त्रिधा काव्यलक्षणं क्रमेण प्रपञ्चयति।

**इत्थं चमत्कारजनकभावनाविषयार्थप्रतिपादकशब्दत्वम्,**

**यत्प्रतिपादितार्थविषयकभावनात्वं चमत्कारजनकतावच्छेदकं तत्त्वम्,**

**स्वविशिष्टजनकतावच्छेदकार्थप्रतिपादकतासंसर्गेण चमत्कारत्ववत्वमेव वा काव्यत्वम्**[5]

इति सुनिर्णीय काव्यलक्षणं, खण्डयित्वा च तददोषौ शब्दार्थौ सगुणावनलङ्कृती पुनः क्वापि[6], इति प्राचीनस्य आचार्यस्य मम्मटस्य काव्यलक्षणम्, एतादृशस्य काव्यस्य कारणं किमिति अग्रे विचारयति।

## काव्यकारणविचारः

ततः काव्यस्य कारणं वदति –

**तस्य च कारणं कविगता केवला प्रतिभा**[7],

अर्थात् कविसमवेता प्रतिभा एव केवलं काव्यस्य उत्पत्तौ कारणं, नान्यत् किञ्चित्। कोऽयं विलक्षणः प्रतिभाख्यपदार्थः येन काव्यरत्नानि प्रकाशन्ते इति चेत्, तत्र विस्तारयति इत्थम्

**सा च काव्यघटनानुकूलशब्दार्थोपस्थितिः, तद्गतं प्रतिभात्वं तु काव्यकारणतावच्छेदकतया सिद्धो जातिविशेषः उपाधिरूपं वा खण्डमिति**[8]

---

[2] रसगङ्गाधरः – पृ 10
[3] रसगङ्गाधरः – पृ 11
[4] रसगङ्गाधरः – पृ 12
[5] रसगङ्गाधरः – पृ 13
[6] काव्यप्रकाशः – 1-4
[7] रसगङ्गाधरः – पृ 27
[8] रसगङ्गाधरः – पृ 27

Cover Page

INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881(Print); IMPACT FACTOR :10.16(2026); IC VALUE:5.16; ISI VALUE:2.286
PEER REVIEWED AND REFEREED INTERNATIONAL JOURNAL
(Fulfilled Suggests Parameters of UGC by IJMER)
Volume:15, Issue:1(5), January 2026
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: Reviewed: Accepted
Publisher: Sucharitha Publication, India
Online Copy of Article Publication Available: www.ijmer.in

अस्य भावः एवं वर्तते - सापि नाम प्रतिभापि काव्यस्य घटनायाः रचनायाः अनुकूलस्य शब्दार्थोभयस्य उपस्थितिः सद्यः स्फूर्तिः इति यावत्। तद्गतं प्रतिभात्वं अर्थात् प्रतिभानिष्ठं स्वविषयकज्ञानसमवायित्वसम्बन्धेन काव्यं प्रति समवयेन प्रतिभा कारणम् इति कार्यकारणभावात्मकानुकूलतर्कमूलात्

**"स्वविषयकज्ञानसमवायित्वसम्बन्धावच्छिन्न-काव्यत्वावच्छेन्न-कार्यतानिरूपिता समवायसम्बन्धावच्छिन्न प्रतिभानिष्ठा कारणता किञ्चिद्धर्मावच्छिन्ना कारणतात्वात्, घटनिष्ठकार्यता निरूपितदण्डनिष्ठकारनतावत्"** इत्यनुमानात् **सिद्धः प्रमाणितः**,एवं च अनुमानेन सिद्ध्यतः पदार्थस्य जातित्वे लाघवम् इति नियमेन प्रतिभात्वं जातिविशेषः इति सिद्धः। प्रतिभा नाम "प्रज्ञा नवनवोन्मेषशालिनी प्रतिभा" इति साहित्यकाराणां सिद्धान्तः।

## प्राचीनमतखण्डनपुरस्सरं काव्यकारणपरिष्कारः

अस्मिन् ग्रन्थे मम्मटाचार्यस्य लक्षणं कारणं च सर्वथा खण्डयति अयम्। मम्मटाचार्यस्तावत् –

**"शक्तिर्निपुणता लोकशास्त्रकाव्याद्यवेक्षणात्।**

**काव्यज्ञशिक्षयाभ्यासः इति हेतुस्तदुद्भवे॥**[9]

इति शक्तिः निपुणता अभ्यासः त्रितयं मिलित्वा काव्यकारणमिति स्वीकरोति। तत्र शक्तिर्नाम प्रभैव। परन्तु जगन्नाथस्तु त्रितयं मिलित्वा न कारणमपि तु केवला प्रतिभैव कारणमिति विचार्य, तस्याश्च पुनः काव्यकारणीभूतायाः प्रतिभायाः कारणं ब्रवीति।

**तस्याश्च हेतुः क्वचित् देवतामहापुरुषादिजन्यमदृष्टम्, क्वचिच्च विलक्षणव्युत्पत्तिकाव्यकारणाभ्यासौ इति।**[10]

अर्थात् प्रतिभोत्पत्तौ कारणद्वयम् एकमदृष्टम् अपरं विलक्षणव्युत्पत्त्यभ्यासौ इति, तच्च अदृष्टं देवताप्रसादेन वा जन्यम् अथवा महापुरुषप्रसादेन वा जन्यम्, एवं द्वितीयं – व्युत्पत्तिः निपुणता लोकशास्त्रकाव्याद्यवेक्षणात् जायमाना, एवमेव पुनः पुनः अभ्यासेन वा जायते। एतत् द्वयं मिलित्वा एकं कारणं भवतीति।

**त्रितयकारणत्वनिरासः**

एवं च प्रतिभां प्रति अदृष्टं व्युत्पत्तिः अभ्यासः इति त्रितयं कारणं भवतु तेन का हानिः इति तदर्थं समाधत्ते –

**"न तु त्रयमेव बालादेः तौ विनापि केवलमहापुरुषप्रसादादपि प्रतिभोत्पत्तेः"**[11]

---

[9] काव्यप्रकाशः – 1- 3
[10] रसगङ्गाधरः – पृ 29
[11] रसगङ्गाधरः – पृ 30

Cover Page

INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881(Print); IMPACT FACTOR :10.16(2026); IC VALUE:5.16; ISI VALUE:2.286
PEER REVIEWED AND REFEREED INTERNATIONAL JOURNAL
(Fulfilled Suggests Parameters of UGC by IJMER)
Volume:15, Issue:1(5), January 2026
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: Reviewed: Accepted
Publisher: Sucharitha Publication, India
Online Copy of Article Publication Available: www.ijmer.in

इति अयं भावः प्रतिभात्वावच्छिन्नं प्रति अदृष्टस्य व्युत्पत्त्यभ्यासयोश्च **तृणारणिमणिन्यायेनैव** कारणता, अन्यथा कर्णपूरप्रभृतीनां बाल्य एव व्युत्पत्त्यभ्यासौ विनापि प्रतिभोत्पत्तेः दर्शनात् तत्र कारणाभावेऽपि कार्योत्पत्तिरिति व्यतिरेकव्यभिचारः स्यात्। कर्णपूरः नाम पञ्चवर्षीयः बालकः स च मूकः आसीत् श्रीकृष्णचैतन्येन तस्य मुखे अङ्गुल्यग्रं प्रवेशनेन तस्य बालस्य सद्यो विलक्षणा कविताशक्तिराविर्भवितेति जनश्रुतिः। अतः व्युत्पत्यभ्यासौ विनापि कारणं विनापि काव्योत्पत्तिदर्शनात् व्यतिरेकव्यभिचारः प्रसज्यते। अतः प्रतिभां प्रति अदृष्टं स्वततन्त्रमेव कारणमिति अङ्गीकरणीयम्।

तयोः जन्मान्तरीयत्वं प्रकल्प्य व्यभिचारवारणमित्थं कर्तुं शक्यते इति पूर्वपक्षिणः आशयं स्वीकृत्य निरस्यति।

**“न च तत्र तयोः जन्मान्तरीयं कल्पनं वाच्यं, गौरवात् मानाभावात् कार्यस्य अन्यथापि उत्पत्तेश्च”**[12] इति वदति।

यथा नैयायिकाः “समाप्तिकामो मङ्गलमाचरेत्[13]” कुत्रचित् मङ्गलाभावेऽपि समाप्तिदर्शनात् तत्र जन्मान्तरीयं मङ्गलं कल्प्यते किल तेन व्यतिरेकव्यभिचारः वारितो भवति, तद्वत् अत्रापि अदृष्टं प्रत्यक्षतया कारणं भवतु, व्युत्पत्त्यभ्यासयोः जन्मान्तरीयत्वं कल्पयामः इति चेत् तन्न संभवति। कुत इति चेत् अयि भोः एतत्सर्वं स्वकपोलकल्पितं भवति।

तत्र तावत् बलवता आगमप्रमाणेन अर्थात् “मङ्गलं सफलम् अविगीतशिष्टाचारविषयत्वात्” इत्येवं रूपेण कार्यकारणभावः निश्चितः अतः मङ्गलसमाप्त्योः कार्यकारणभावः प्रमाणान्तरसिद्धः। प्रकृते तु कार्यकारणभाव एव प्रमाणाभावः इति गौरवम्। प्रमाणाभावः, एवं कार्यस्य अन्यथानुपपत्तेश्च नाम अदृष्टेन कार्यसिद्धिः भवति। अतः त्रितयं कारणं न भवतीति। प्रतिभां प्रति अदृष्टमेकं कारणं व्युत्पत्त्यभ्यासौ अपरं कारणं भवतः इति। तदा व्यभिचारदोषः न भवति।

पुनः प्रश्नः उदेति , अयि भोः सर्वथा अदृष्टमेव करणं भवतु प्रतिभां प्रति किमर्थं व्युत्पत्त्यभ्यासयोः कारणता स्वीकार्या इति चेत् तदपि न संभवति।

**“नापि केवलमदृष्टमेव कारणमित्यपि वक्तुं न शक्यम्’ कियन्तञ्चित् कालं काव्यं कर्तुमशक्नुवतः कथमपि सञ्जातव्युत्पत्यभ्यासयोः प्रतिभायाः प्रादुर्भावदर्शनात्”**। [14]
अर्थात् जन्मना असिद्धा प्रतिभा, एकस्य विंशतिः त्रिंशद्वर्षानन्तरं महतां विदुषां सहवासेन वा व्युत्पत्त्यभ्यासाभ्यां काव्यकरणशक्तिः आगता। तत्र अदृष्टस्य कारणत्वं नास्ति। एतयोः कारणत्वमङ्गीकार्यम्।

पुनश्शङ्कते तत्रापि अदृष्टस्य कारणत्वं भवतु इति चेत्, तर्हि पूर्वमेव प्रतिभा प्रादुर्भूय काव्यं जनयेत् इति। अतः प्रतिभां प्रति अदृष्टं तथा व्युत्पत्त्यभ्यासौ कारणं भवति। **अदृष्टाव्यवहितोत्तरजायमानप्रतिभात्वावच्छिन्नं प्रति व्युत्पत्त्यभ्यासौ कारणम्** इति स्वीकरणीयम् ।

---

[12] रसगङ्गाधरः – पृ 28
[13] तर्कसङ्ग्रहदीपिका
[14] रसगङ्गाधरः – पृ 29

Cover Page

INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881(Print); IMPACT FACTOR :10.16(2026); IC VALUE:5.16; ISI VALUE:2.286
PEER REVIEWED AND REFEREED INTERNATIONAL JOURNAL
(Fulfilled Suggests Parameters of UGC by IJMER)
Volume:15, Issue:1(5), January 2026
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: Reviewed: Accepted
Publisher: Sucharitha Publication, India
Online Copy of Article Publication Available: www.ijmer.in

पुनः पृच्छति भो यत्र च अदृष्टव्युत्पत्त्यभ्यासाभ्यामेव प्रतिभोत्पत्तिर्जाता, अदृष्टस्य तत्र निष्फलत्वमिति तत्र प्रतिबन्धकमदृष्टान्तरं कल्पनीयमिति।अस्य च अयमाशयः एकमदृष्टं प्रतिभोत्पत्तौ साधकम्। अपरमदृष्टं प्रतिभोत्पत्तौ प्रतिबन्धकमिति। तत्र समाधत्ते अदृष्टाद्वयं च बहुत्र कल्पनीयं, नाम प्रतिभोत्पत्तिहेतुभूतमदृष्टमेकं पतत्प्रतिबन्धकीभूतं च अन्यददृष्टमित्येवम्। तादृशादृष्टद्वयकल्पनापेक्षया क्लृप्तव्युपत्त्यभ्यासयोरेव कारणत्वकल्पने लाघवं भवति। अतः प्रागुक्तसरणिरेव ज्यायसी भवति।

अर्थात् **अदृष्टाव्यवहितोत्तरजायमानप्रतिभात्वावच्छिन्नं प्रत्यदृष्टं कारणम्, व्युत्पत्त्यभ्यासव्यवहितोत्तरजायमानप्रतिभात्वावच्छिन्नं व्युत्पत्त्यभ्यासौ कारणम्** इति कार्यतावच्छेदककोटौ अव्यवहितोत्तरनिवेसशात् अदृष्टोत्पन्नप्रतिभायाः व्युत्पत्त्यभ्यासौ न कारणं, व्युत्पत्त्यभ्यासयोरभावेऽपि प्रतिभोत्पत्तौ नैव व्यभिचार इति निष्कर्षः।

अन्यथा अत्र कारणद्वयमस्ति, कार्यमेकमेवास्ति। अर्थात् अदृष्टं विना एकत्र प्रतिभोत्पत्तिः व्युत्पत्यभ्यासौ विना अपरत्र प्रतिभोत्पत्तिः अतः व्यतिरेकव्यभिचारः इति चेत्। तस्य इत्थं समाधानं ददाति तादृशादृष्टस्य तादृशव्युत्पत्त्यभ्यासयोश्च प्रतिभागतं वैलक्षण्यं कार्यतावच्छेदकम् अतो न व्यभिचार इति। यद्वा कारणद्वयं तथैव कार्यद्वयम्। विलक्षणकाव्यं प्रति विलक्षणप्रतिभाकारणम्। एवं च कारणवैलक्षण्यं, कार्यवैलक्षण्यम् इति स्वीकरणीयम्।

पुनराशङ्कते यत्र च व्युत्पत्त्यभ्यासौ स्तः प्रतिभारूपं कार्यं नोत्पद्यते,क्ष् तत्र अन्वयव्यभिचारः किल अर्थात् मादृशस्य जनस्य द्वयमपि कथञ्चित् सम्पन्नं किन्तु काव्यलेखनसामर्थ्यरूपप्रतिभा नोत्पन्ना इति। तत्र किं समाधानमिति चेत् मूले तु

**न च सतोरपि व्युपत्त्यभ्यास्योर्यत्र न प्रतिभोत्पत्तिः तत्रान्वयव्यभिचार इति वाच्यम्, तत्र तयोस्तादृशवैलक्षण्ये मानाभावेन कारणतावच्छेदकानवच्छिन्नत्वात्।**[15]

यद्यपि एकस्य व्युत्पत्त्यभ्यासौ स्तः प्रतिभा नोत्पन्ना चेत् तत्र सामान्यरूपेण द्वयोः स्थितिः तत्र वैलक्षण्यं नास्ति। विलक्षणव्युत्पत्त्यभ्यासौ आवश्यकौ अतः व्युत्पत्त्यभ्यासयोः वैलक्षण्याभावात् प्रतिभा नोत्पन्ना इति अन्वयव्यभिचाराभावः। एवं च अदृष्टमेकं कारणम्, व्युत्पत्यभ्यासौ अपरं कारणम्।

एवं च अत्र ग्रन्थे काव्यं प्रति केवलं प्रतिभा एका एव स्वतन्त्रं कारणं, तां च प्रति क्वचित् अदृष्टं क्वचिच्च व्युत्पत्त्यभ्यासौ इति प्रतिपाद्य, तत्र ये अन्वयव्यतिरेकव्यभिचाराः प्रसज्यन्ते तेषां वारणं च कृत्वा काव्यं प्रति प्रातिभायाः कारणत्वं निर्णीतम्। तच्च अत्र यथामति यथाग्रन्थं च विस्तारितम्।

---

15 रसगङ्गाधरः – पृ 32

Cover Page

INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881(Print); IMPACT FACTOR :10.16(2026); IC VALUE:5.16; ISI VALUE:2.286
PEER REVIEWED AND REFEREED INTERNATIONAL JOURNAL
(Fulfilled Suggests Parameters of UGC by IJMER)
Volume:15, Issue:1(5), January 2026
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: Reviewed: Accepted
Publisher: Sucharitha Publication, India
Online Copy of Article Publication Available: www.ijmer.in

सन्दर्भग्रन्थसूची

1. रसगङ्गाधरः
2. काव्यप्रकाशः
3. तर्कसङ्ग्रहदीपिका